शास्त्री-प्रतिष्ठाविषये 'साहित्यम्'
इति स्वीकृत्य अधीयाना द्वितीयवर्षीयाश्छात्राणां
कृते अनिवार्य प्रथमपत्रे दर्शनं निर्धारितमस्ति।
अद्य तर्कसंग्रह इत्यत्र मङ्गलाचरणानुरूपं ग्रन्थं प्रारभ्यते
अत्र 'तर्कसंग्रहः' इति ग्रन्थकर्त्ता श्रीमदन्नंभट्टः
सर्वप्रथमं मङ्गलाचरणमनुसरति।
'निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

नमस्कारात्मकंम् आशीर्वादात्मकं वस्तुनिर्देशात्मक-
मिति त्रिविधं मङ्गलम्। अत्र करशिर संयोगानु-
कूलो व्यापार रूपः नमस्कारात्मक मङ्गलाम्प्रयणं-
मस्ति।

मङ्गलं विघ्नविनाशार्थं क्रियते।
गुरुपरम्परानुसारेण व्याख्यानं षड्विधं श्रुतम्।

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।
आक्षेपश्च समाधानं व्याख्यानं षड्विधं मतम्॥

अस्मिन् श्लोके अन्वयः क्रियते—
(मया अन्नंभट्टेन) विश्वेशं हृदि निधाय गुरुवन्दनं(च) विधाय, बालानां सुखबोधाय 'तर्कसंग्रहः' क्रियते।

व्याख्या—

विश्वेशं - जगत्कर्त्तारं, जगत्स्वामी-परमात्मामित्यर्थः। हृदि - मनसि। निधाय- नितरां ध्यायित्वा। गुरुवन्दनं - गुरुचरणपूजनं च विधाय- कृत्वेत्यर्थः। बालानां - अधीतव्याकरणकाव्यकोशादि ग्रन्थः अनधीतन्यायशास्त्र जिज्ञासु बालः, तेषां इत्यर्थः। सुखबोधाय - सुखेन अल्पायासेन बोधः सुखबोधः, तस्मै- पदार्थतत्त्वज्ञानायेत्यर्थः।
तर्कसंग्रहः - तर्क्यन्ते तर्क्यन्ते प्रमितिविषयीक्रियन्ते इति तर्का द्रव्यादिपदार्थास्तेषां सङ्ग्रहः संक्षेपेणोद्देश-लक्षणपरीक्षा यस्मिन् स ग्रन्थः 'तर्कसंग्रहः' इति अभिधानकः।

नाममात्रेण वस्तुसंकीर्तनमुद्देशः; यथा - द्रव्यं गुण इति। असाधारणधर्मो लक्षणम्; यथा - गन्धवत्त्वं पृथिव्या लक्षणम्। लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा। अतोद्देशस्य पक्षज्ञानं फलं, लक्षस्येतरभेदज्ञानं, परीक्षाया लक्षणे दोषपरिहार फलमिति बोध्यम्।
क्रियते - विरच्यते, निर्मीयते वा इति फलितम्।

व्याकरणम्–

श्लोकेऽस्मिन् कर्मप्रधानत्वात् कर्मवाच्य प्रयोगः। अत्र 'विश्वेशम्' इति कर्मणि द्वितीया।
हृदि - इत्यत्र सप्तम्येकवचनरूपम्।
नि उपसर्गपूर्वकं डुधाञ् धारणपोषणयो इत्यस्मात् ल्यप् प्रत्यये सिद्धिः।
गुरोः वन्दनं गुरुवन्दनमित्यत्र 'षष्ठी तत्पुरुष समासः। बालानाम् – बालशब्दस्य षष्ठीबहुवचनरूपम्। सुखबोधाय - इत्यत्र चतुर्थी एकवचनम्।

क्रियते – 'डुकृञ् करणे' इत्यस्माद् "भावकर्मणोः" इत्यनेन कर्मणि 'वर्तमाने लट्' इत्यनेन लट्लकारे, आत्मनेपदत्वात् 'तिप्तस्-' इत्यादिना 'त' प्रत्यये टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे कृते "क्रियते" इत्यस्य सिद्धिः जायते।

भावार्थः–

हृदय में विश्व के स्वामी परमात्मा को रखकर तथा गुरु की वन्दना कर बालकों को सुखपूर्वक न्यायपदार्थों का बोध कराने के लिए 'तर्कसंग्रह' नामक ग्रन्थ की रचना की जा रही है।

अस्तु।

शुभम्भूयात्॥

Scanned with CamScanner